form of nescience प्रमादाख्य: अज्ञानमृत्यु: स प्रथममास्यात्मना परिणमते Sanat-Bh. 192. 11 (*on* 1. 7); 201. 18 (*on* 1. 16); **ii** death of an ignorant person (called *bālamaraṇa*) तद्भद्र कुरु सद्धर्मं विरमाज्ञानमृत्युत: PārśvaC. 6. 622.

**अज्ञानमेरु** (ajñāna-meru) *m.* mountain of ignorance कोऽज्ञानमेरु: Nāṭa. 4. 20.

**अज्ञानमोचन** (ajñāna-mocana) *n.* removal of ignorance अज्ञानमोचनं साध्यं विशेषज्ञो हि मोचक: S'ivaP. i. 18. 98 (23B. 7)

**अज्ञानमोहतस्** (ajñānamoha-tas) *adv.* due to infatuation caused by ignorance त्वया हि सुमहत्पापं कृतमज्ञानमोहत: LiṅgaP. ii. 3. 39.

**अज्ञानमोहित** (ajñāna-mohita) *adj.* deluded by ignorance व्यसनसागरात् । घोरादद्य समुत्तीर्णावुभावज्ञानमोहितौ MahāBhā. viii. 49. 115; xiv. 85. 10; अवतीर्णस्त्वमित्युक्तो जनैरज्ञानमोहितै: ViṣṇuP. v. 34. 4 = BrahmP. 207. 4; संसारचक्र एतस्मिन् जन्तुरज्ञानमोहित: । भ्राम्यन् सुखं च दु:खं च भुङ्क्ते BhāgP. vi. 17. 18; ततो विध्वंसयामास यज्ञानज्ञानमोहित: BrahmP. 209. 5; द्विखण्डं तु चरं लिङ्गं कुर्वन्त्यज्ञानमोहिता: S'ivaP. i. 19. 33 (25B. 10); KathāSaSāg. iii. 2. 14; अज्ञानमोहितं प्रति तन्निवृत्तये पारमार्थिकनित्यत्वोपदेशसमये अहं त्वम् ··· इति व्यपदेशात् GītāBh.(Rā.) 60. 1 (*on* 2. 12); इति तत्र तु ये शून्यं वदन्त्यज्ञानमोहिता: AnuVyā. 68A. 11 (4. 2); सर्वजन्तव: । जायन्ते च म्रियन्ते च हा हन्ताज्ञानमोहिता: KulārT. 1. 71.

**अज्ञानयामिनी** (ajñāna-yāminī) *f.* night in the form of ignorance अहंभावोल्लसद्यक्षा क्षीणा नाज्ञानयामिनी YogVā. vi(2). 24. 18.

**अज्ञानयोग** (ajñāna-yoga) *m.* meditation of an ignorant person (false meditation) अज्ञानयोगमेतस्य भित्त्वा लोचनमानसे । अपप्तत्तां प्रदेशेषु तेषु तस्या: PadmP.(Ra.) 39. 192; अज्ञानयोगयुक्तस्य न त्वेतत्त्वयि विद्यते KūrmP. 663. 3(2. 31); [Abl.] due to ignorance तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगत: AparoAnu. 75; वयं भ्रामिता: सर्वथाज्ञानयोगात् GaṇeP. i. 13. 14.

**अज्ञानयोगिन्** (ajñāna-yogin) *adj.* who practises meditation out of ignorance, ignorant Yogin ज्वरश्च जायते सद्यस्तत्तदज्ञानयोगिन: MārkP. 39. 53; S'ārṅgaPa. 4509.

**अज्ञानरजनी** (ajñāna-rajanī) *f.* night in the form of ignorance सुखं तद्व: शास्तुर्दिशतु शिवमज्ञानरजनीव्यवच्छेदोद्गच्छन्महिमघनसंध्यातप इव Subhā-RaK. 1. 12.

**अज्ञानरज्जु** (ajñāna-rajju) *f.* rope of ignorance अज्ञानरज्ज्वा बद्धानाम्··· । महादेवादृते नान्यं शक्र पश्यामि मोचकम् SaurP. 32. 29.

**अज्ञानरहित** (ajñāna-rahita) *adj.* devoid of ignorance or nescience मलरहितानज्ञानरहितान् GītāBh.(Rā.) 593. 2 (*on* 14. 14); अनिद्रमज्ञानरहितम् VedāntKa. 234. 10 (*on* ii. 1. 11)

**अज्ञानराशि** (ajñāna-rāśi) *m.* name of an ascetic विक्रीतलज्जो रमयन्भुजङ्गानज्ञानराशि: समुपागतोऽयम् LaṭaMe. 1. 29; तापसो ऽज्ञानराशिश्च Campa-S'reKa. 398.

**अज्ञानरिपु** (ajñāna-ripu) *m.* enemy in the form of ignorance अहम् ···अज्ञानरिपुणा हत: YogVā. v. 35. 41.

**अज्ञानरूप** (ajñāna-rūpa) *adj.* [*f.* –ā] **i** having the form of ignorance, of the nature of ignarance तस्मात्सिद्धं ग्राहकाद्भिन्नं ग्राह्यमज्ञानरूपं च TātpaṬ(U.) 275. 11 (*on* 5(4). 147); अज्ञानरूपक्रियाजन्यस्य अतिशयस्य आवरणरूपस्यैव प्रकृते कर्मत्वात्मकत्वात् JñānBiPra. 2. 14; तर्हि किंरूपा सा (माया) कल्प्यते अज्ञानरूपा इति चेत् तदज्ञानं भावरूपमभावरूपं वेति विवेचनीयम् Bhāsk. 13. 1 (*on* i. 1. 1); **ii** of the nature of the absence of knowledge यत्त्वज्ञानरूपमप्रामाण्यं तत्र दोषाणां व्यापारो नैवास्माकमपि विद्यते NyāyRa. 62. 8 (*on* 2. 55); 210. 16 (*on* 5. 9); **iii** of the nature of what is other than knowledge अज्ञानरूपस्य संनिकर्षादे: प्रामाण्यसमर्थनमयुक्तम् PramāMī. 22. 30 (*on* i. 1. 29); 3. 2 (*on* i. 1. 2); **iv** of the nature of nescience तावताप्यज्ञानरूपासिद्धिरेव SiddhāMu. 44. 21 (*on* 74); अज्ञानरूपावरणाभिभवाय तत्संश्लेष आवश्यक: AdvaiSi. 482. 8; वैचित्र्यस्याप्यज्ञानरूपशक्तिविशेषरूपत्वात् GuruCandr. iii. 3. 11; *n.* (essential) nature of the absence of knowledge अज्ञानरूपविपरीतं विज्ञानरूपम् NyāyRa. 307. 20 (*on* 5(3). 145)

**अज्ञानरूपता** (ajñānarūpa-tā) *f.* the state of being of the nature of what is other than knowledge अज्ञानरूपतायां पुन: प्रमाणम् NyāyVārPari. 519. 5.

**अज्ञानरूपत्व** (ajñānarūpa-tva) *n.* the state of being of the nature of ignorance अस्य ह्यज्ञानरूपत्वे ज्ञानरूपस्मृतिजनकत्वं न स्यात् PramāMī. 22. 6 (*on* i. 1. 29); किमिदं जडत्वं नाम । ··· अज्ञानरूपत्वं वा अस्वप्रकाशत्वं वा Vādā. 48. 8.

**अज्ञानरूपदोष** (ajñānarūpa-doṣa) *m.* fault or defect in the form of ignorance विरुद्धयोर्जीवब्रह्मणोरैक्यमज्ञानरूपदोषमूलमन्यतरमिथ्यात्वमन्तरेण नोपपद्यते NītiMā. 21. 14; अज्ञानरूपदोषप्रयुक्तधीविषयत्वयोग्यत्वं स्वाश्रयनिष्ठाभावप्रतियोगितारूपम् GuruCandr. ii. 313. 21.

**अज्ञानरूपहेतु** (ajñānarūpa-hetu) *adj.* whose cause or reason is in the form of insentient (body) अज्ञानरूपहेतुस्तदहेतुत्वप्रसङ्गत: NyāyVi. 2. 79 (comm. अज्ञानं अचेतनं रूपं स्वभाव: यस्य शरीरस्य स एव हेतु: कारणं यस्य स: )

**अज्ञानरूपिन्** (ajñāna-rūpin) *adj.* having the form of ignorance प्रत्यग्याथात्म्यविज्ञानं मृत्युरज्ञानरूपिण: BṛĀraUBhVā. iii. 2. 19.

**अज्ञानलक्षण** (ajñāna-lakṣaṇa) *adj.* **i** characterised by ignorance, caused by ignorance तमस: परस्तात् अज्ञानलक्षणात् मोहान्धकारात् परं तम् अनुचिन्तयन् याति GītāBh.(S'aṅ.) 237. 17 (*on* 8. 9); ChāndoUBh. 191. 9; विचित्रो जायते बुद्धे: प्रत्ययोऽज्ञानलक्षण: (comm. अज्ञानोपाधिनिबन्धन इत्यर्थ: ) UpadeSā. 257. 35; BṛĀraUBhVā. (Sambandha.) 903; अज्ञानलक्षणे तु प्रपञ्चविलासेऽनुपपत्तिचोद्यं चाचोद्यमेव BālaKrī. ii. 33. 9 (*on* 3. 70); स्वयमेव कृतं पूर्वमज्ञानलक्षणं महत् SkandP. i(1). 15. 41; **ii** of the nature of the absence of knowledge तत्राज्ञानलक्षणस्याप्रामाण्यस्य दोषाधीनत्वं नास्ति NyāyRa. 58. 20 (*on* 2. 45); *n.* definition of ignorance or nescience स्वयमेव हि···अज्ञानलक्षणमभिधाय NyāySu.(Ja.) 20A. 10 (*on* i. 1. 1); भ्रमोपादानत्वमज्ञानलक्षणम् AdvaiSi. 545. 22.

**अज्ञानलिङ्ग** (ajñāna-liṅga) *n.* inferential mark of ignorance अज्ञानलिङ्गान्येतानि कुत: सन्ति चिदात्मनि AdhyāRā. vi. 1. 52.

**अज्ञानलीन** (ajñāna-līna) *adj.* hidden in or covered by ignorance or nescience अज्ञानलीनमखिलं जगदस्ति सूक्ष्मम् SaṁkṣeS'ā. 3. 120 (ii. 220. 20)

**अज्ञानलेश** (ajñāna-leśa) *m.* trace of ignorance अतोऽज्ञानलेशादेव तद्विदश्शरीराद्याभास एष्टव्य: IṣṭaSi. 76. 19; 74. 15; जीवन्मुक्तावज्ञानलेशानुवृत्त्यभ्युपगमेन सांशत्वात् SiddhāLeSaṁ. 110. 2.

**अज्ञानवचन** (ajñāna-vacana) *n.* expression of ignorance दुर्ज्ञानत्वादज्ञानवचनं गौणम् S'ābaBh. 128. 7 (*on* i. 2. 13); 1667. 5 (*on* ix. 1. 25); इति भवत्यज्ञानवचनस्य प्रत्यक्षविरोध: TantrVār. 7. 9 (*on* i. 2. 2); 30. 23 (*on* i. 2. 13); NyāySu.(So.) 63. 16 (*on* i. 2. 13)

**अज्ञानवञ्चिता** (ajñāna-vañcitā) *adj.* (*f.*) deceived by ignorance नैवोपलक्षितासि त्वं धिग् मामज्ञानवञ्चिताम् MalliC. 6. 376.

**अज्ञानवत्** (ajñāna-va(n)t) *adj.* possessing ignorance, ignorant अज्ञानवत्यपि सदैव कथंचिदेव ज्ञानं त्वयि स्फुरति विश्वविकासहेतु: KalyāMaSt. 30 (पक्षे अज्ञान् अवति अपि); जातकर्म कृतं नास्य पित्राज्ञानवता हरे SkandP. iv. 28. 51; BhaviP. 582B. 22 (iii(4). 18. 22); येऽज्ञानवन्त: पुरुषा जगत्त्रये वैरं विकुर्वन्ति महात्मभि: समम् PadmP. ii. 55. 6; ब्रह्म च पुनर्न जीवस्यात्ममात्रं अज्ञानवद्वा AṇuBh. 16. 25 (*on* i. 1. 3)

**अज्ञानवत्त्वप्रकारकत्व** (ajñānavattvaprakāraka-tva) *n.* the state af having the possession of nescience as an adjunct शुद्धचितोऽज्ञानाश्रयत्वविषयकप्रत्ययान्तराभावादयं प्रत्ययोऽहमर्थेऽज्ञानवत्त्वा(? त्त्व)प्रकारकत्वेन न निर्णेतुं शक्यत इति न युक्तम् GuruCandr. ii. 367. 18.

**अज्ञानवधिन्** (ajñāna-vadhin) *adj.* who kills through ignorance अज्ञानवधिनां दण्डो विहित: MahNirvāT. 11. 73.

**अज्ञानवर्जितता** (ajñānavarjita-tā) *f.* the state of being free from ignorance अज्ञानवर्जिततया परमेश्वरोऽसौ सर्वज्ञ एव SaṁkṣeS'ā. 2. 183 (ii. 111. 20)

**अज्ञानवर्त्मन्** (ajñāna-vartman) *n.* path of ignorance आदित्यादेरिहावाप्तिरात्मनोऽज्ञानवर्त्मना BṛĀraUBhVā. iv. 3. 90.

**अज्ञानवलित** (ajñāna-valita) *adj.* covered with ignoranco, full of ignorance अज्ञानवलितो बाल्ये मदमूढश्च यौवने । ··· कदा कुशलभाग्जन: Subhāṣi. 3302.

**अज्ञानवश** (ajñāna-vaśa) *m.* influence of ignorance [Abl.] due to ignorance, under the influence of ignorance तदेव वाच्यं प्रणवो हि वाचको विभाव्यतेऽज्ञानवशान्न बोधत: AdhyāRā. vii. 5. 48; iii. 9. 33; उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनस: NaiṣC. 9. 132; NyāySu.(Ja.) 30A. 8 (*on* i. 1. 1); तव सुतेनाज्ञानवशात्तथा कृतम् SiṁhāDvā. 219. 12 (3); अज्ञानवशादन्यथासतोऽन्यथा प्रत्ययो जायते VedāntKau. 424. 19 (*on* iv. 4. 4); 126. 6 (*on* i. 4. 10); यथा रज्जुरज्ञानवशात् सर्पदण्डधारादिरूपेण विवर्तते SarvaDaKau. 122. 11; यदर्थमज्ञानवशाद् भ्रमन्ति स्वस्वाभिमानाद् ग्रहगोलविज्ञा: SiddhāTaVi. 225. 2; विचित्रा: शक्तिसमूहा जीवे विद्यमाना अप्यज्ञानवशात्तिरोहिता: LalitāSaBh. 43. 31 (*on* 75); [Inst.] due to ignorance (अन्त:पुरान्त: ) सोऽज्ञानवशेन प्रविशेदपि PariPar. 3. 275.

**अज्ञानवह्नि** (ajñāna-vahni) *m.* fire in the form of ignorance अज्ञानवह्निसंतप्तं निर्वापयति य: शनै: । ज्ञानामृतेन BhaviP. 278A. 24 (i. 187. 31)